http://www.howtoexam.com

(Pages : 3) **3213**

**Reg. No. : ...............................**

**Name : ...................................**

# IV Semester M.A. Examination, June 2009
## SANSKRIT (Special)
## SN 242 : Nyaya – VIII (2005 Admn. Onwards)
## व्युत्पत्तिवाद: – द्वितीयाप्रथमखण्ड:
## दिनकरी – शब्दखण्ड: च

Time : 3 Hours Max. Marks : 75

***सूचना** : 1) **संस्कृत** भाषायामुत्तराणि देयानि ।*
*2) **संस्कृत** भाषायां लेखने **देवनागरी** लिपिरुपयोक्तव्या ।*

HowToExam.com

I. कोष्ठात् समुचितमुत्तरमादाय लिखत । **(1×15=15 Marks)**

1) केषां प्रथमान्तार्थमुख्य विशेष्यक: एव शाब्दबोध: ?
(नैयायिकानां, वैयाकरणानां, मीमांसकानाम् , चार्वाकाणां)

2) प्राचीननैयायिकमते धात्वर्थ: क: ?
(व्यापार:, फलं, फलावच्छिन्नव्यापर:, भावना)

3) नवीननैयायिकानां मते धात्वर्थ: क: ?
(फलावच्छिन्नव्यापार:, आख्यातार्थ:, भावना, फलं)

4) 'कर्मणि द्वितीया' इत्यनुशासनात् द्वितीयार्थ: क: ?
(कर्मत्वं, क्रियात्वं, विशेषणं, विशेष्यं)

5) कर्मत्वं च अत्र ___________ ।
(क्रियाजन्यफलशालित्वं, अप्रधानकर्म, प्रधानकर्म, फलावच्छिन्नव्यापार:)

6) 'याचमान: शिवं सुरान्' इति वाक्ये अप्रधानकर्म ___________ ।
(शिवं, सुरान् , याचमान:, सर्वे)

7) 'अजां ग्रामं नयति' इति वाक्ये अजादे: ___________ ।
(अप्रधानकर्मत्वं, प्रधानकर्मत्वं, कर्तृत्वं, कर्मत्वं)

8) पौरवं गां याचते विप्र: इत्यत्र प्रधानकर्म ___________ ।
(गां, पौरवं, याचते, विप्र:)

**P.T.O.**

Download latest Placement Paper, puzzles, technical and aptitude question paper

http://www.howtoexam.com



9) गां व्रजं रुणद्धि इत्यत्र प्रधानकर्म भवति ___________ ।
(गां, व्रजं, रुणद्धि, व्यापार:)

10) शाब्दबोधे पदार्थधी: ___________ भवति ।
(द्वारं, वृत्ति:, फलं, व्यापार:)

11) पदेन सह पदार्थस्य सम्बन्ध: ___________ ।
(शक्ति:, शाब्दबोध:, कारणं, भावना)

12) नैयायिकमते पदमेव ___________ ।
(शक्यम् , शक्तम् , विशेषणं, विशेष्यम् )

13) यौगिकरूढस्योदाहरणं भवति ___________ ।
(उद्भिद् , कमलं, मल्लिक, पद्मं)

14) अरूढवानरो वृक्ष: इत्यत्र आरूढ पदं ___________ ।
(विशेषणं, विशेष्यं, तात्पर्यग्राहकं, धर्मितावच्छेदकं)

15) इत्थं च शुकवाक्येऽपि ईश्वरीयतात्पर्यज्ञानं ___________ ।
(कार्यम् , कारणम् , विशेषणम् , विशेष्यम् )

II. वाक्येन वाक्याभ्यां वा **दशानामुत्तरं** लिखत । **(1×10=10 Marks)**

16) आकाङ्क्षा का ?

17) स्वारसिकप्रयोगनियम: किम् ?

18) नवीनमते 'गम्' धातोरर्थ: ।

19) भूमिं गच्छति न महीरुहमित्यादौ नञर्थबोध: कीदृश: ?

20) 'ब्राह्मणाय धनं ददाति' इति वाक्ये धात्वर्थ: क: ?

21) नवीनमते द्वितीयार्थ: क: ?

22) णिजर्थ: क: ?

23) गुरुं धर्मं पृच्छतीत्यादौ धात्वर्थ: क: ?

24) शाब्दबोधे वृत्ति: का ?

25) 'नव्यास्तु इच्छैव शक्ति: इति कल्पते' – कस्मात् ?

26) प्रथमान्तपदोपस्थाप्य: क: ?

Download latest Placement Paper, puzzles, technical and aptitude question paper

http://www.howtoexam.com



27) निरूढलक्षणा का ?

28) व्यवहारात् शक्तिग्रह: भवति – कथम् ?

29) वाक्यशेषात् शक्तिग्रह: कथं संभवति ?

30) 'तस्माच्छक्तिजात्याकृतिविशिष्टव्यक्तौ विश्राम्यति' – कस्मात् ?

III. प्रकरणं प्रदर्श्य **चतुर्णा**माशयं विशदयत । **($2^1/_2$×4=10 Marks)**

31) एवं त्यजिगमि प्रभृतिसमभिव्याहृतकर्म प्रत्ययस्य फलविशेष एव नियतं तादृशं तात्पर्यमिति न विभागादि तात्पर्येण ग्रामं गच्छतीत्यादि प्रयोग:'' ।

32) द्वितीयासप्तम्यो: समानार्थकत्वेऽपि व्युत्पत्तिभेदज्ञापनायैव पृथक् सूत्रेण तयोर्विधानात्'' ?

33) ''संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धप्रथमान्तपदोपस्थाप्य:'' ।

34) इत्यश्च समासे न क्वापि शक्ति:, पदशक्त्यैव निर्वाहादिति'' ।

35) ''वृद्धा: युवान: शिशव:, कपोता: खले यथामि युगपत्पतन्ति तथैव सर्वे युगपत्पदार्था: परस्परेणान्वयिनो भवन्ति'' ।

36) ''वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्'' ।

IV. शाब्दबोधप्रकारं लिखत । **(5×1=5 Marks)**

37) गां दोग्धि पय: ।

**अथवा**

38) पौरवं गां याचते विप्र: ।

V. खण्डिकया उत्तरं लिखत । **(5×1=5 Marks)**

39) लक्षणाया: लक्षणम् ।

**अथवा**

40) शाब्दबोधप्रकार: ।

VI. 41) फलस्य द्वितीयार्थत्वे उद्भावितान् दोषान् परिहृत्य प्राचीनमतं निरुपयत । **(15×1=15 Marks)**

**अथवा**

42) 'पाचयत्योदनं सहायम्' इति प्रयोगस्य साधुत्वं वदतां मतमुपन्यस्य णिजर्थ: क: इति ग्रन्थोक्तरीत्या विशदयत ।

VII. 43) शक्तिग्रहोपाया: के – विशदयत । **(15×1=15 Marks)**

**अथवा**

पदं कतिविधम् – सोदाहरणं प्रतिपादयत ।

Download latest Placement Paper, puzzles, technical and aptitude question paper